गुणेन सह गुणिनः, क्रियया सह क्रियावतः,
जात्या सह व्यक्तेः, विशेषेण सह नित्
द्रव्यस्य यो सम्बन्धः स संयोग भवितुं
नार्हति। यतः संयोगस्य नाशे द्रव्यनाशो न
भवति। परन्तु अवयविनः नाशे, गुणिनः
नाशे, क्रियावतः नाशे, व्यक्तेर्नाशे अवयवेन
सह अवयविनः, गुणेन सह गुणिनः, क्रियया
सह क्रियावतः, जात्या सह व्यक्तेः च
सम्बन्धः अवयवादीनां नाश पर्यन्तं अनुभूयत
एव। कार्यविनाशात प्राक् पर्यन्तं एतादृश
सम्बन्धः वर्तते एव। च सम्बन्धः संयोग
विलक्षण एव, तेन नित्यसम्बन्धः समवायः
इति समवायलक्षणं भवितुम अर्हति। पञ्च-
सुगम पदार्थेषु समवायस्य स्थितिर्भवति।

*

समवायस्य अस्तित्वे

दीपिकाकारेन एकं अनुमानं प्रमाणं प्रदत्तम्
इति। तद् यथा नीलो घटः इति विशिष्ट
प्रतीतिः विशेषेन विशेष्य सम्बन्ध विषया
विशिष्ट प्रत्ययत्वात् दण्डी इति प्रत्ययवत्
इति। नीलो घटः इत्युक्ते नीलः विशेषणं
घटश्च विशेष्यः। विशेषेन सह विशेष्यस्य
वर्णन

सम्बन्धः सदा अनुभूयते ; परन्तु स सम्बन्धः
न संयोगरूपः। तादृशः सम्बन्धः समवाय एव।
अनेन क्रमेण समवायसिद्धिर्भवति। न केवलं
तत् समवायस्य अस्तित्वे न सिद्धे सति
कार्यकारणभावस्यापि उपपादनं न सम्भवेत्।
कार्यकारणभावविषये कारणतावच्छेदकसम्बन्धः
तादात्म्यसम्बन्धः कार्यतावच्छेदकसम्बन्धस्तु
समवाय एव। तेन जन्यभावपदार्थस्य उत्पत्तौ
कार्यतावच्छेदकसम्बन्धरूपेण समवायस्य अस्तित्वं
सिद्ध्यति। तथा च रूपरसगन्धस्पर्शशब्दादीनां
गुणानां प्रत्यक्षे इन्द्रियप्रत्यासत्तिः अपेक्षिता भवति।
तेनापि समवायसिद्धिर्भवति। तेन च नैयायिकाः
समवायं प्रत्यक्षसिद्धं इति ब्रुवन्ति। प्रस्थानान्तरेषु
समवायः न स्वीकृतः तत्र तादात्म्यसम्बन्ध एव
स्वीकृत इति॥

(2) अभावपदार्थं निरूप्य तस्याधिकरणात्मकत्वं सम्भवति न वेति विचारयत !

Ans 2nd para
न्यायवैशेषिकनये अभावस्तु अन्तिमः पदार्थः। ग्रन्थकारेण द्रव्यादिसमवायान्त षण्णां भावपदार्थानां स्वरूपं प्रतिपाद्य स्वरूपाणि प्रतिपाद्य अभावस्य चतुर्विध इत्यादिना अभावपदार्थभेदान् निरूपयति। परन्तु तेन अभावलक्षणं न प्रदत्तम् इति।

भावभिन्नत्वं अभावत्वं इत्युक्ते अभावभिन्नत्वं भावत्वं इत्यपि भावपदार्थसमग्रस्य लक्षणं स्यात्। तेन अन्योन्याश्रयशङ्का जायते। अथ निर्दोषं अभावलक्षणं तु - (नञ्याद्) निषेधाभिलापक-प्रत्ययगम्यत्वम् अभावत्वम्। "अभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति॥" इत्युक्त्वा अस्य ग्रन्थस्य अन्तिमे चतुर्विधाभाव-स्वरूपाः व्याख्याताः।

प्रागभावस्य स्वरूपेन उक्तम् — 'अनादिः सान्तः प्रागभावः, उत्पत्तेः पूर्वं कार्यस्य' इति प्रागभावलक्षणे आकाशादौ अतिव्याप्ति वारणाय सान्त इति पदम् घटादौ अतिव्याप्ति वारणाय अनादिरिति पदं प्रयुक्तम्। दीपिकायां उक्तं च - 'प्रतियोगि-समवायिकारणवृत्तिः प्रतियोगिजनकः भविष्यतीति व्यवहारहेतुः प्रागभावः।' अस्य अभावस्य आदि-र्नास्ति, अर्थात् कस्मात् कालात् अयम् अभावः

अन्योन्याभावस्वरूपं वक्तुकामेन अन्नं भट्टेन उक्तम् — "तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः। यथा घटः पटो नेति।" अस्मिन निदर्शने घटे घटत्वं पटे पटत्वं च तादात्म्ये घटत्वं पटाधिकरणे न वर्तते, पटत्वं अपि घटाधिकरणे नेति। अतएव घटाधिकरणे पटस्य तथा पटाधिकरणे घटस्य योऽभावः स परस्परसम्बन्धित्वात् अन्योन्याभाव इत्युच्यते। अस्य प्रकारस्य अभावस्य नियामकस्तु तादात्म्य सम्बन्ध इति। *

▫ प्राभाकर मिमांसक अभावपदार्थं न स्वीकुर्वन्ति। अभावस्य अधिकरणस्वरूपत्वात् भूतले घट नास्ति इत्युक्ते केवलं भूतलेन सहैव चक्षुः संयोगे कृते भूतल स्वरुप एव अनुभूयते। न कश्चित् अतिरिक्त घटाभावः इति गुरुमतखण्डनार्थं तर्कसंग्रहदीपिकायां उक्तं "केवलाधिकरणादेव नास्तीति व्यवहारोपपत्तौ अभावो न पदार्थान्तरमिति गुरवः। तन्न। अभावानङ्गीकारे कैवल्यस्य निर्वक्तुमशक्यत्वात्।" अन्येषां आचार्याणां मतेन अभावस्य अधिकरणत्वे त्रोदशा समुत्पाद्यन्ते। भूतले घटाभावो यदि भूतल-स्वरूप एव तर्हि आधारआधेयभावस्य अनुपपत्तिः स्यात्। द्वितीयतस्तु अभावस्य अधिकरणस्वरूपत्वे

तेन च यः पदार्थः व्यवहृतः ज्ञानविषयः
न स कदापि व्यवहारसाधकोऽपि भवितुं
नार्हति। व्यवहारे अन्येषु कारणेषु सत्सु
अपि असाधारणं कारणं ज्ञानम् इत्यत्र नास्ति संशयः।
सर्वव्यवहारहेतुर्गुणो बुद्धिः इत्युक्ते निर्विकल्पकज्ञानस्य
व्यवहारसाधनत्वाभावात् तत्र अव्याप्तिः स्यात् इत्याशङ्क्य
बुद्धिर्ज्ञानं इत्युक्तम्। गौतमेन उक्तम् — "बुद्धिरुपलब्धिः
ज्ञानमिति अनर्थान्तरम्"। बुद्धिलक्षणे ज्ञानशब्दप्रयोगात्
अन्नंभट्टेन सूचितम् ज्ञानत्वजातिरेव ज्ञानलक्षणम्।
ज्ञानत्वजातिरस्ति इति प्रमाणयितुं दीपिकायाम्
उक्तम् — "जानामीत्यनुव्यवसायगम्यं ज्ञानत्वं लक्षणमित्यर्थः"

तत्र पृच्छ्यते किं ज्ञानमिति?
पण्डितानां मतेन अर्थप्रकाशो हि ज्ञानम्। तैजसप्रकाशस्य
निर्विषयकत्वेऽपि दार्शनिकसम्प्रदायाः तैजसप्रकाश-
दृष्टान्तेन ज्ञानं बोधयितुम् अचेष्टन्त। तेषु
पण्डितेषु अपि मतद्वैधता अस्ति। कस्यचित्
मतेन ज्ञानं प्रदीपवत् घटपटादीन् यथा प्रकाशयति
तथा स्वमपि। अन्यमतानुसारेण ज्ञानं चक्षुर्वत्,
चक्षुः यथा स्वयम् अप्रकाशितं सत् घटपटादि-
वस्तुजातं प्रकाशयति, ज्ञानमपि तद्वत्।
प्राभाकरमीमांसकाः विज्ञानवादिनो बौद्धाः अद्वैत-
वेदान्तिनश्च प्रथमपक्षभूताः। द्वितीयपक्षाश्च
भाट्टमीमांसकाः न्यायवैशेषिकाश्च। तेषां मतेन
विषयप्रकाशद्वारा ^ज्ञानविषय अनुमितिर्भवति। न्यायवैशे-
षिकाणां मतेन ज्ञानं स्वयं अप्रकाशितं सत्
विषयं प्रकटयति।

इत्यादि प्रतीतेः कारणतावच्छेदकरूपेण घटज्ञानत्वं
पटज्ञानत्वं इत्यादि धर्मौ सिद्धतः। यद्यपि
अद्धज्ञानत्वं न सिद्ध्यति, तस्य दुर्ग्रहत्वात् तथापि
विशिष्टज्ञानस्य कारणतावच्छेदकरूपेण ज्ञानत्वं
अवश्यमेव स्वीकरणीयम्। केषांचित् आचार्याणां
मतेन ज्ञानत्ववत्त्वं ज्ञानत्वं इति। अर्थात् यः
आत्मनि ज्ञानत्वस्य तज्ज्ञानमिति।

स्मृतिलक्षणम्

'सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्' इत्युक्त्वा ज्ञानस्य
द्वैविध्यम् उक्तम्। यथा सा द्विविधा — स्मृतिरनुभवश्च।
"तत्र संस्कारमात्रजन्यं ज्ञानं स्मृतिः" इति स्मृतिलक्षणम्।
अर्थात् यत् ज्ञानं केवलं संस्कारजन्यं किन्तु न
संस्कारेतरजन्यं संस्कारातिरिक्तजन्यं वा,
तादृशं ज्ञानं स्मृतिरिति। स्मृतिलक्षणे संस्कार-
शब्देन भावनाख्यसंस्कार एव बोधव्यः। तस्यैव
संस्कारस्य आत्मनि अवस्थानात्। वेदस्थितिस्थापकौ
संस्कारौ आत्मनि न तिष्ठतः। अतएव भावनाख्य-
संस्कारद्वारा यत् ज्ञानमुत्पद्यते तद् ज्ञानं
स्मृतिरिति। स्मृतिलक्षणे ज्ञानशब्देन संस्कारध्वंसे
अतिव्याप्तिर्वारिता। संस्कारजन्यं इति पदेन
प्रत्यक्षादि अनुभवे स्मृतिलक्षणस्य नास्ति व्याप्तिः।
मात्रशब्दद्वारा प्रत्यभिज्ञायां अतिव्याप्तिः निवारिता

इति ) केवलं मात्रशब्दस्य यथा श्रुतार्थग्रहणे स्मृतिलक्षणे अपि असम्भवो नाम दोषश्च प्रसक्तिः स्यात् । स्मृतिज्ञानस्य केवलसंस्कार-मात्रजन्यत्वाभावात् । स्मृतेः भावकार्यपदार्थत्वात् यस्य कस्यचिदपि भावकार्यपदार्थस्य उत्पत्तौ केवलं निमित्तकारणस्य कार्यकारणाभावात् इति । स्मृतिः एकविधं ज्ञानम् । (ज्ञानोत्पत्तौ आत्मा समवायिकारणम् । आत्ममनःसंयोगः असमवायि कारणम् , कालदिगादि निमित्तकारणं भवति । तेषु निमित्तकारणभूतेषु संस्कारः अन्यतमं निमित्तकारणम् । अतः एकेन निमित्त कारणेन न स्मृतिकार्योत्पत्तिः भवेत् । इत्थम् असम्भव दोषं वारयितुम उच्यते मात्रशब्देन आत्मादिकारणानां निषेधः विवक्षितः न । केवलं बहिरिन्द्रिय- निषेध एवाभिप्रेत इति ।)

(प्रत्यभिज्ञाया उत्पत्तौ संस्कारस्य कारणत्वेऽपि प्रत्यभिज्ञा न स्मृतिरिति । न्यायवैशेषिक-नये प्रत्यभिज्ञा प्रत्यक्षवदेव । यतः वाराणस्याम एकदा दृष्टस्य देवदत्तस्य कालान्तरे देशान्तरे च मथुरायां दृष्टे सति प्रत्यक्षज्ञानजन्य संस्कारस्य उद्बोधनात् सोऽयं देवदत्त इति प्रत्यभिज्ञा भवति / जायते । तस्मिन् ज्ञाने न केवलं स्मृतिमात्रस्य कारणत्वम् । इन्द्रियसन्निकर्षत्वमपि तत्र अस्ति । अत एव मात्रशब्देन स्मृतिलक्षणे प्रत्यभिज्ञा ज्ञान व्यवच्छेदो भवति ।)

"आत्मा मनसा संयुज्यते मन इन्द्रियेण, इन्द्रियमर्थेन, ततः प्रत्यक्षज्ञानमुत्पद्यते" इति। योग्यइन्द्रियेण योग्यविषयः ग्रहणमेव सन्निकर्षम् इति।

१. <u>संयोगः सन्निकर्षः</u> :→ "चक्षुषाघटप्रत्यक्षजनने संयोगः सन्निकर्षः" इति। आत्मनः सहकृत चक्षुरिन्द्रियेण यदा घटप्रत्यक्षं भवति तदा चक्षुरिन्द्रियेण सह घटस्य यः साक्षात् सम्बन्धः सः संयोगः सन्निकर्षः एव।

२. <u>संयुक्तसमवायः सन्निकर्षः</u> → अयं परम्परा सम्बन्धः एव। "घटरूपप्रत्यक्षे संयुक्तसमवायः सन्निकर्षः" इत्युक्तं ग्रन्थकारेण। चक्षुषा सह यस्य घटस्य संयोगसन्निकर्षः भवति तस्मिन् घटे घटरूपं समवाय सम्बन्धेन तिष्ठति। अतएव घटरूपप्रत्यक्षे संयुक्तसमवायः सन्निकर्षः स्वीक्रियते, "चक्षुः संयुक्ते घटे रूपस्य समवायात्" इति।

३. <u>संयुक्तसमवेतसमवायः सन्निकर्षः</u> → एषः सन्निकर्षः घटरूपत्व सामान्यप्रत्यक्षे स्वीक्रियते। यदि घटरूपं दृष्ट्वा द्रष्टा स्वयमेव घटरूपत्व जातेः प्रत्यक्षम् अनुभवति तदा तादृशे प्रत्यक्षे असमवायिकारणं तु संयुक्तसमवेतसमवाय सन्निकर्षः एव। यतः चक्षुः संयुक्ते रूपे

घटरूपं समवेतं रूपत्व जातिरपि तस्मिन् रूपे समवेता, तेन संयुक्तसमवेतसमवाय सन्निकर्षः रूपेण परम्परा सम्बन्धेन घटरूपत्वजातेः प्रत्यक्षं भवति । "रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः । चक्षुः संयुक्ते घटे रूपं समवेतं, तत्र रूपत्वस्य समवायात् ।" इति

४. <u>समवायः सन्निकर्षः</u> → कर्णविवरवर्तिनः आकाशस्य श्रोत्रेन्द्रियत्वसंज्ञात्वात् तस्मिन् आकाशे समवाय सम्बन्धेन शब्दस्य अवस्थानात् शब्दश्रवणे समवायसन्निकर्षः स्वीक्रियते । उक्तं च ग्रन्थकारेण — "श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः । कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात् ।" इति ।

५. <u>समवेतसमवायसन्निकर्षः</u> → शब्दं शृण्वता पुरुषेण यदि शब्दश्रवणेन सह शब्दत्वजातेरपि प्रत्यक्षं स्वीकरोति तदा तस्मिन् प्रत्यक्षे सन्निकर्षः समवेतसमवाय रूप भवेत् । यतः आकाशे शब्दः समवेतः तस्मिन् शब्दे शब्दत्वजातिः समवेता, तेन ग्रन्थकारेणोक्तम् — "शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः । श्रोत्रे समवेते शब्दे शब्दत्वस्य समवायात् ।" इति

६. विशेषणविशेष्यभावसन्निकर्षः → भावपदार्थस्य

प्रत्यक्षे आदौ सन्निकर्षषट्कम् उक्त्वा इदानीं अभावपदार्थवादिनां नैयायिकानां मतेन अभावप्रत्यक्षे सन्निकर्षविषयः उच्यते। स सन्निकर्षस्तु विशेषणविशेष्यभावरूप एव। घटाभाववद् भूतले यदा घटनाशे अपसारणे वा घटाभावो भवति तदा तादृशानुभवस्याकारो घटाभाववद् भूतलं इति भवति। तस्मिन् अनुभवे घटाभावस्त्वा विशेषणं भूतलं च विशेष्यम् इति। अतएव चक्षुसन्निकृष्टे भूतले विशेषणविशेष्यसन्निकर्षेण घटाभावस्य प्रतीतिजायते। "घटाभाववद्-भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्" इति। एवंविधं व्याख्यानं ग्रन्थकारेण उक्तम् — "एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम् इति।"

— ० —

1st para → आचार्य अन्नं भट्ट विरचिते तर्कसंग्रह इति ग्रन्थे यथार्थानुभव प्रसङ्गे चत्वारि प्रमाणानि प्रदीयन्ते। तेषु प्रत्यक्षम् इति प्रथमप्रमाणम्। — "यथार्थानुभवश्चतुर्विधः - प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। तत्करणमपि चतुर्विधम् - प्रत्यक्षानुमानोपमानशब्दभेदात्।" प्रत्यक्ष प्रसङ्गे ग्रन्थकारेणोक्तम् — "इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्" इति। अतः ग्रन्थकारः प्रत्यक्षविषये सन्निकर्षः आलोच्यते।

(4) प्रत्यक्षप्रकरणे सन्निकर्षः शब्दस्य कोऽर्थः ? नाम्नो विभज्य सन्निकर्षान् प्रदर्शयेत ।

Ans सन्निकर्षः संयोगादिरित्युक्त्वा तर्कसंग्रहदीपिकाकारेण सन्निकर्षशब्दद्वारा सम्बन्ध एव बोधितः । साक्षात्-सम्बन्धः परम्परासम्बन्धस्य यद्यपि सन्निकर्षः लौकिकालौकिक भेदाभ्यां द्विविधः, तथापि सन्निकर्षः षड्विधः इति ग्रन्थकारवचनवशात् सन्निकर्षः शब्दद्वारा केवलं लौकिकसन्निकर्षः एव गृह्यते ।

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः — संयं इति वचनद्वारा अन्नंभट्टेन सन्निकर्षस्य षड्विधत्वमुक्तम । तद् यथा संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति इति षड्विधेषु सन्निकर्षेषु प्रथमत्रयः सन्निकर्षाः चाक्षुषप्रत्यक्षविषये ततश्च सन्निकर्षद्वयं श्रावण-प्रत्यक्षविषये ~~तस्य~~ अन्तिम सन्निकर्षस्तु अभाव-प्रत्यक्षविषये उदाहृतम । "चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः" इत्युक्तं ग्रन्थकारेण । दीपिकाकारेण उक्तम — द्रव्यप्रत्यक्षे सर्वत्र संयोगः सन्निकर्ष इत्यर्थः । अत्र द्रव्यशब्देन रूपीद्रव्यस्य एव बोध्यम सर्वत्रैव बहिः प्रत्यक्षे आलोकसहकृतत्वम आवश्यकमेव । नचेत तमस एव प्रत्यक्षापत्तिः स्यात । ग्रन्थकारेण प्रत्यक्षप्रक्रिया उक्तं यथा

न्यायवैशेषिकानां मतेन ज्ञानम् आत्मनः विशेषगुणैव। तस्य अन्यत् वैशिष्ट्यं क्षणिकत्वमिति। प्रथमक्षणे ज्ञानमुत्पद्यते द्वितीयक्षणे तिष्ठति, तृतीयक्षणे विनश्यति च। केवलं अपेक्षाज्ञानं चतुर्थक्षण-विनाशि इति स्वीक्रियते। अन्यत् सर्वं ज्ञानं तृतीयक्षणवृत्ति ध्वंसप्रतियोगि भवति।

ज्ञानमव्याप्यवृत्ति च, तेन यस्मिन् आत्मनि ज्ञानं तस्मिन् आत्मनि ज्ञानाभावोऽपि। केवलं शरीरावच्छेदे आत्मनि ज्ञानं भवति। चक्षुरादीन्द्रियाणां शरीराश्रितत्वात् इन्द्रिय साहाय्यं ऋते ज्ञानं नोत्पद्यते। जीवात्मनो ज्ञानम् अव्याप्यवृत्ति परमात्मनो ज्ञानं तु नेति। आत्ममनः संयोगः पूर्वकेन इन्द्रियविषय-संयोगेन ज्ञानमुत्पद्यते। आत्मनः ज्ञानस्य समवायि-कारणत्वात् आत्मनि एव ज्ञानं भवति तत्र आत्ममनः संयोगः एव असमवायि कारणम् अन्यत् सर्वं निमित्तं कारणमिति। घटज्ञानं स्वविषयं घटमेव प्रकाशयति। न सा स्वयम् आत्मानं वा। यज्ज्ञानं केवलं विषयं प्रकाशयति तद् विशिष्टं ज्ञानं व्यवसाय इत्युच्यते। व्यवसायज्ञानं विषयीकृत्य यज्ज्ञानं उत्पद्यते तद् अनुव्यवसाय इति। अहं घटं इमं जानामि (अथवा एतद् घटवान् अहम्) इत्यत्र अनुव्यवसाये अहं पदवाच्य आत्मा घटः घटज्ञानं च विषया भवन्ति। अनुव्यवसायस्य विषयीभूतज्ञानस्य अनुगतप्रतीतिर्भवति। इदं घटज्ञानं इदं पटज्ञानम्

अनन्तगौरवो भवेत् । तृतीयस्य यद्वस्तु यदिन्द्रियग्राह्यं तदभावोऽपि तदिन्द्रियग्राह्य इति नियमस्य व्याघातः स्यात् । अपि च अधिकरण-भेदेऽपि अभावभेदः भवति ; यथा कपिसंयोगी-वृक्षे शाखाग्रे कपिसंयोगो दृश्यते वृक्षमूले न । यदि अभावः केवलमधिकरणस्वरूपेण तर्हि वृक्षमूलाव-च्छिन्ने कपेरभावोऽस्ति इति इत्यपि वक्तुं न शक्यते इति ।

---

③ का नाम बुद्धिः ? कति च तस्या भेदाः ? स्मृतिलक्षणं विशदं व्याख्यायताम् ?

Ans न्यायवैशेषिकसम्मतगुणालोचनावसरे बुद्धिः को गुणः इति आलोचितुम् इच्छुता अन्नंभट्टेन उक्तम् "सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्" इति । बुद्धिलक्षणे गुणपदद्वारा कालादौ सर्वव्यवहारपदद्वारा रूपादौ बुद्धिलक्षणस्य अतिव्याप्तिः वारितौ ।

अस्य अर्थस्तु पदार्थो यः सर्वविधव्यवहारस्य हेतुर्भवति स च गुण पदार्थः बुद्धिरिति यस्य अपरं नाम ज्ञानमिति । ज्ञानम् सर्वव्यवहारहेतुः इति असंशयं तत्त्वम् । लक्षणस्यास्य हेतुशब्दद्वारा ज्ञातं हि सकलव्यव-हारस्य समाप्तौ असाधारणं कारणम् इत्युक्तम् ।

अनुभूयते तत्र वक्तुं शक्यते। किन्तु कार्योदयेन एवं प्रकारस्य अभावस्य अवसानं जायते। घटोत्पत्तेः पूर्वं घटप्रतियोगिको योऽभावः घटोत्पत्तेरनन्तरं स घटप्रतियोगिकोऽभावो विनश्यति। तेन घटोत्पत्तेः पूर्वं घटाभावः प्रागभाव एव। तेन अस्य लक्षणे उक्तम् — "उत्पत्तेः पूर्वं कार्यस्येति।" घटो भविष्यति इति वाक्येन घटस्य प्रागभावः सूचितो भवति।

"सादिरनन्तः प्रध्वंसः, उत्पत्त्यनन्तरं कार्यस्य" इति प्रध्वंसाभावलक्षणं ग्रन्थकारेन प्रदत्तम्। सादिपदेन आकाशादौ अनन्तपदेन घटादौ लक्षणाति व्याप्तिः वारितम्। ध्वंसः को व्यवहारहेतुः तदुच्यते दीपिकाकारेन यथा — "प्रतियोगिजन्यः प्रतियोगिसमवायिकारणवृत्तिः ध्वस्त व्यवहारहेतुः ध्वंसः।" घटोत्पत्तेः अनन्तर यदि तत् घटः कारणवशात् विनश्यति तर्हि तद् घटप्रतियोगिको योऽभावः स अनन्तरूपः परन्तु तस्य अभावस्य आदिरस्ति। घटो नष्टः इत्यादि वाक्यद्वारा प्रध्वंसाभाव एव उच्यते।

योऽभावः अतीतवर्तमानभविष्यत्-कालसम्बन्धी स अत्यन्ताभावः भवति। तेन उक्तम् — त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ता-भावः। यथा भूतले घटो नास्तीति। अस्य अर्थस्तु भूतले घटो नासीत् न भवति न भविष्यति वा। तेन अयम् अभावः अनादिरनन्त एव। अनुरूपमेव वायोः रूपोभावोऽपि अत्यन्ताभावः भवति।

4

(2) अभावपदार्थं निरूप्य तस्याधिकरणात्मकत्वं सम्भवति न वेति विचारयत ।

## अभावः

1st para → आचार्य अन्नंभट्ट विरचिते तर्कसंग्रहे इति ग्रन्थे पदार्थस्वरूपालोचना संक्षेपे क्रियते। पदस्य अर्थः पदार्थः। अस्मिन् ग्रन्थे सप्तपदार्थाः आलोचितवन्तः। एतेषु सप्तपदार्थेषु अभावः अन्यतमः। पदार्थः तु भाव अभाव भेदेन द्विविधः।

# तर्कसंग्रहः

1) समवायस्य किं लक्षणम् ? स कुत्र कुत्र वर्तते ? तस्यास्तित्वे किं वा प्रमाणम् ?

व्यावृत्तिव्यवहार वा लक्षणस्य प्रयोजनम् । अतः —

Ans भिन्नं भिन्नेन समवायस्वरूपप्रसङ्गे आदौ उक्तम् "समवायस्त्वेक एव", दीपिकायां उक्तम् "समवायस्य भेदो नास्तीत्याह समवायस्त्विति।" तेन अनित्यत्वेन समवायः कश्चिद् भेद रहितः पदार्थः केवलम् इत्येव गम्यते।

ग्रन्थस्य उपान्तिमांशे ग्रन्थकारेन समवाय लक्षणं प्रदत्तम् — "नित्यसम्बन्धः समवायः इति।" अतएव समवायः नित्यसम्बन्धरूपः पदार्थविशेषः इति गम्यते। लक्षणे नित्यमिति पदद्वारा संयोगसम्बन्धे अतिव्याप्तिः वारिता। सम्बन्धपदेन नित्याकाशादौ अतिव्याप्तिः वार्यते। *

** नित्यसम्बन्धरूप समवायः अयुतसिद्धविषयद्वये वर्तते। पञ्च अयुतसिद्धाः युग्मपदार्थाः भवन्ति। यथा अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती तथा विशेष नित्यद्रव्ये च। [विषयद्वयस्य मध्ये यदेकं अविनश्यत् सत् अपराश्रित तिष्ठति तत् युग्मं अयुतसिद्धं इत्युच्यते।] अवयवेन सह अवयविनः,